च चतुर्द्दश। विडालः सप्त मासांस्तु ततो जायेत मानवः । मातापितरावाक्रुश्य सारिकः सम्प्रजायते । ताड़यित्वा तु तावेव जायते कच्छपो नृप! । कच्छपो दश वर्षाणि त्रीणि वर्षाणि शल्लकः । व्यालो भूत्वा च षण्मासांस्ततो जायेत मानुषः । भर्त्तृपिण्डमुपाश्नन् यो राजद्विष्टानि सेवते । सोऽपि मोहसमापन्नो मृतो जायेत वानरः । वानरो दश वर्षाणि पञ्च वर्षाणि मूषिकः । श्वाऽथ भूत्वाऽथ षण्मासांस्ततो जायेत मानुषः । न्यासापहर्त्ता तु नरो यमस्य विषयं गतः । संसाराणां शतं गत्वा कृमियोनौ प्रजायते । तत्र जीवति वर्षाणि दश पञ्च च भारत! । दुष्कृतस्य क्षयं कृत्वा ततो जायेत मानुषः । असूयको नरश्चापि मृतो जायेत शार्ङ्गकः । विश्वासहर्त्ता च नरो मीनो जायेत दुर्म्मतिः । भूत्वा मीनोऽष्ट वर्षाणि मृगो जायेत भारत । मृगस्तु चतुरो मासांस्ततश्छागः प्रजायते । छागस्तु निधनं प्राप्य पूर्णे संवत्सरे ततः । कीटः प्रजायते जन्तुस्ततो जायेत मानुषः। धान्यान् यवांस्तिलान् माषान् कुलत्थान् सर्षपांश्चणान् । कलायानथ मुद्गांश्च गोधूमानतसींस्तथा । शस्यस्यान्यस्य हर्त्ता च मोहाज्जन्तुरचेतनः । स जायते महाराज ! मूषिको निरपत्रपः । तत्र प्रेत्य महाराज ! मृगो जायेत शूकरः । शूकरो जातमात्रस्तु रोगेण म्रियते नृप ! । श्वा ततो जायते मूढः कर्म्मणा तेन पार्थिव ! । भूत्वा श्वा पञ्च वर्षाणि ततो जायेत मानवः । परदाराभिमर्षन्तु कृत्वा जायेत वै वृकः । श्वा शृगालस्ततो गृध्रो व्यालः कङ्को वकस्तथा । भ्रातुर्भार्य्यान्तु पापात्मा यो धर्षयति मोहितः । पुंस्कोकिलत्वमाप्नोति सोऽपि संवत्सरं नृप ! । सखिभार्य्यां गुरोर्भार्य्यां राजभार्य्यान्तथैव च । धर्षयित्वा तु कामाय मृतो जायेत शूकरः । शूकरः पञ्च वर्षाणि दश वर्षाणि वै वृकः । विड़ालः पञ्च वर्षाणि दश वर्षाणि कुक्कुटः । पिपीलकस्तु मासांस्त्रीन् कीटः स्यान्मासमेव तु । एतानासाद्य संसारान् कृमियोनौ प्रजायते । तत्र जीवति मासांस्तु कृमियोनौ चतुर्द्दश । ततोऽधर्म्मक्षयं कृत्वा पुनर्ज्जायेत मानवः । उपस्थिते विवाहे तु यज्ञे दानेऽथवा विभो ! । मोहात्करोति यो विघ्नं स मृतो जायते कृमिः । कृमिर्ज्जीवति वर्षाणि दश पञ्च च भारत ! । अधर्म्मस्य क्षयं कृत्वा ततो जायेत मानवः । पूर्व्वं दत्त्वा तु यः कन्यां द्वितीये दातुमिच्छति । सोऽपि राजन् ! मृतो जन्तुः कृमियोनौ प्रजायते । तत्र जीवति वर्षाणि त्रयोदश युधिष्ठिर ! । अधर्म्मसङ्क्षये मुक्तस्ततो जायेत मानुषः । देवकार्य्यमकृत्वा तु पितृकार्य्यमथापि वा । अनिर्व्वाप्य समश्नन् वै मृतो जायेत वायसः । वायसः शतवर्षाणि ततो जायेत कुक्कुटः । जायते व्यालकश्चापि मासं तस्मात्तु मानुषः । ज्येष्ठं पितृसमञ्चापि भ्रातरं योऽवमन्यते । सोऽपि मृत्युमुपागम्य क्रौञ्चयोनौ प्रजायते । क्रौञ्चो जीवति मासांस्तु दश द्वौ सप्त पञ्च च । ततो निधनमापन्नो मानुषत्वमुपाश्नुते । वृषलो ब्रह्मणीं गत्वा कृमियोनौ प्रजायते । ततः सम्प्राप्य निधनं जायते शूकरः पुनः । शूकरो जातमात्रस्तु रोगेण म्रियते नृप ! । श्वा ततो जायते मूढः कर्म्मणा तेन पार्थिव ! । श्वा भूत्वा कृतकर्म्माऽसौ जायते मानुषस्ततः । तत्रापत्यं समुत्पाद्य मृतो जायेत मूषिकः । कृतघ्नस्तु मृतो राजन् ! यमस्य विषयं गतः । यमस्य पुरुषैः क्रुद्धैर्व्वधं प्राप्नोति दारुणम् । दण्डं समुद्गरं शूलमग्निकुम्भञ्च दारुणम् । असिपत्रवनं घोरं वालुकां कूटशाल्मलीम् । एताश्चान्याश्च वह्वीः स यमस्य विषयं गतः । यातनाः प्राप्य तत्रोग्रास्ततो बध्यति भारत ! । ततो हतः कृतघ्नः स तत्रोग्रैर्भरतर्षभ ! । संसारचक्रमासाद्य कृमियोनौ प्रजायते । कृमिर्भवति वर्षाणि दश पञ्च च भारत ! । ततो गर्भं समासाद्य तत्रैव म्रियते शिशुः । ततो गर्भशतैर्जन्तुर्व्वहुभिः सम्प्रपद्यते । संसारांश्च बहून् गत्वा ततस्तिर्य्यक् प्रजायते । ततो दुःखमनुप्राप्य बहुवर्षगणानिह । अपुनर्भवसंयुक्तस्ततः कूर्म्मः प्रजायते । दधि हृत्वा वकश्चापि प्लवो मत्स्यानसंस्कृतान् । चोरयित्वा तु दुर्व्वुद्धिर्मधुदंशः प्रजायते । फलं वा मूलकं हृत्वा अपूपं वा पिपीलिकाः । चोरयित्वा तु निष्पावं जायते हलगोलकः । पायसं चोरयित्वा तु तित्तिरित्वमवाप्यते । हृत्वा पिष्टमयं पूपं कुम्भोलूकः प्रजायते । अयो हृत्वा तु दुर्व्वुद्धिर्वायसो जायते नरः । कांस्यं हृत्वा तु दुर्व्वुद्धिर्हारीतो जायते नरः । राजतं भाजनं हृत्वा कपोतः संप्रजायते । हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते । पत्रोर्णं चोरयित्वा तु क्रकरत्वं स गच्छति । कौशिकन्तु ततो हृत्वा नरो जायेत वर्त्तकः । अंशुकं चोरयित्वा तु शुको जायेत मानवः । चोरयित्वा दुकूलन्तु मृतो हंसः प्रजायते । क्रौञ्चः कार्पासिकं हृत्वा मृतो जायेत मानवः । चोरयित्वा नरः पट्टं त्वाविकञ्चैव भारत! । क्षौमञ्च वस्त्रमादाय शशो जन्तुः प्रजायते